শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে সুন্দরকাণ্ডে

# ॥ অষ্টমঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ অষ্টমঃ সর্গঃ ॥

## হনুমতা পুনঃ পুষ্পকস্য দর্শনম্

স তস্য মধ্যে ভৱনস্য সংস্থিতো
মহদ্বিমানং মণিরত্নচিত্রিতম্।
প্রতপ্তজাম্বূনদজালকৃত্রিমং
দদর্শ ধীমান্ পৱনাত্মজঃ কপিঃ॥ **5.8.1** ॥

তদপ্রমেযাপ্রতিকারকৃত্রিমং
কৃতং স্ৱযং সাধ্ৱিতি ৱিশ্ৱকর্মণা।
দিৱং গতে ৱাযুপথে প্রতিষ্ঠিতং
ৱ্যরাজতাদিত্যপথস্য লক্ষ্ম তৎ॥ **5.8.2** ॥

ন তত্র কিঞ্চিন্ন কৃতং প্রযত্নতো
ন তত্র কিঞ্চিন্ন মহার্ঘরত্নৱৎ।
ন তে ৱিশেষা নিযতাঃ সুরেষ্ৱপি
ন তত্র কিঞ্চিন্ন মহাৱিশেষৱৎ॥ **5.8.3** ॥

তপঃ সমাধানপরাক্রমার্জিতং
মনঃসমাধানৱিচারচারিণম্।
অনেকসংস্থানৱিশেষনির্মিতং
ততস্ততস্তুল্যৱিশেষনির্মিতম্॥ **5.8.4** ॥

মনঃ সমাধায তু শীঘ্রগামিনং
দুরাসদং মারুততুল্যগামিনম্।

www.prapatti.com

মহাত্মনাং পুণ্যকৃতাং মহর্দ্ধিনাং
যশস্বিনামগ্র্য মুদামিৱালযম্॥ **5.8.5** ॥

ৱিশেষমালম্ব্য ৱিশেষসংস্থিতং
ৱিচিত্রকূটং বহুকূটমণ্ডিতম্।
মনোঽভিরামং শরদিন্দুনির্মলং
ৱিচিত্রকূটং শিখরং গিরের্যথা॥ **5.8.6** ॥

ৱহন্তি যৎকুণ্ডলশোভিতাননা
মহাশনা ৱ্যোমচরা নিশাচরাঃ।
ৱিৱৃত্তৱিধ্ৱস্তৱিশাললোচনা
মহাজৱা ভূতগণাঃ সহস্রশঃ॥ **5.8.7** ॥

ৱসন্তপুষ্পোৎকরচারুদর্শনং
ৱসন্তমাসাদপি চারুদর্শনম্।
স পুষ্পকং তত্র ৱিমানমুত্তমং
দদর্শ তদ্ ৱানরৱীরসত্তমঃ॥ **5.8.8** ॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে সুন্দরকাণ্ডে অষ্টমঃ সর্গঃ ॥

www.prapatti.com